International Journal of Sanskrit Research 2021; 7(1): 523-526

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 523-526
© 2021 IJSR
www.anantaajournal.com
Received: 04-01-2021
Accepted: 07-02-2021

**डॉ. नन्दिघोषमहापात्रः**
सहायकाचार्यः सर्वदर्शनविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीसदाशिवपरिसरः, पुरी, उत्कलाः, भारत

**Corresponding Author:**
**डॉ. नन्दिघोषमहापात्रः**
सहायकाचार्यः सर्वदर्शनविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीसदाशिवपरिसरः, पुरी, उत्कलाः, भारत

# वेदोपनिषत्सु भक्तितत्त्वविमर्शः

**डॉ. नन्दिघोषमहापात्रः**

**प्रबन्धसारः**
संसारे उत्पन्नः जीवः स्वभावत एव सुखस्य कामनां करोति । सुखं च लोके अनेकविधं भवति । तत्र पुनः भौतिकमाध्यात्मिकमिति प्रकारद्वयं प्रसिद्धं लोके । साम्प्रतिकसमाजः भौतिकसुखमनुधावति । तावता जीवनं धन्यं मनुते । परन्तु तदेव सुखं न अन्तिमः ततोऽप्युत्कृष्टं नित्यनिरतिशयं भगवत्प्रेमरूपं सुखं भवति । तच्च सुखं भक्त्या साध्यम् । अत एव शास्त्रेषु भक्तितत्त्वस्य तावदेव प्राधान्यं यावत् ज्ञानस्य दत्तम् ।
तत्र भक्तिर्नाम भगवद्विषयिणी अनन्यमनसा चिन्तनम् इति गीताशास्त्रेषु वैष्णवसम्प्रदायेषु बहुधा निरूपितम् । भगवान्-भक्तयोर्मध्ये अनन्यसम्बन्धः भक्तिः भवति । भक्तस्य भगवति अहेतुकी प्रीतिः भक्ति इति । मनोवाक्कायेन आत्मनः भगवति समर्पणं भक्तिः । निष्कामकर्म अपि भक्तिः इत्यभिधीयते । अत एव भगर्वीतायां भक्तानां प्रकारभेदसन्दर्भे ज्ञानीभक्त एव भगवतः प्रियतमः इति साक्षात् गीताचार्येण अभिव्यक्तम् । तदुक्तम् –

तेषां ज्ञानी नित्ययुक्त एक भक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥[24]

एवं च यः भक्तः निष्कामभावनया भगवन्तमहरहः सेवते सः एव ज्ञानीभक्तः । फलकामनां विना विहितार्चनः ज्ञानीभक्तः इति । भक्तिविषये प्रकारभेदाः भागवतादिषु नवधा भवन्तीति । वेदान्तदृष्ट्या भक्तिनिरूपणप्रसङ्गे निरूपितमिति । अतः अत्र तस्य पिष्टपेषणं न क्रियते । गीताचार्यमतानुसारेण भक्तिः परापरेति भेदेन द्विधा भवति । फलकामनया सह भगवति या प्रीतिः जीवेन प्रदर्श्यते सा अपरा इति अभिधीयते । फलकामनां विना भगवति या अहेतुकी प्रीतिः जीवस्य जायते सा परा इति उच्यते । एषा पराभक्तिरेव ज्यायसी भवति ।

**कूटशब्दः** जीवः स्वभावत एव सुखस्य कामनां करोति, भक्तितत्त्वविम

**प्रस्तावना**
सकलशोकनिवृत्तिः परमानन्दप्राप्तिश्च जीवनस्य लक्ष्यमिति उद्दिष्टम् । तस्य लक्ष्यस्य सिद्ध्यर्थं भक्तिः अपरं साधनम् । कुशाग्रधियः साक्षात् ज्ञानग्रहणे समर्थाः । ये तु मन्दाः तेषां तितिर्षया भगवता सर्वजनप्रियाः मार्गाः उपदिष्टाः सन्ति । स एव भक्तिमार्ग इति कथ्यते । भक्तिमार्गस्य मूलं स्रोतः उद्गीत्थविद्यायाम् अध्यारोपापवादन्यायेन भज्यः देवः, भक्तः अर्चनकर्ता, भजनं देवतोषणानुकुलं कर्म एतत् त्रिपूटीमाध्यमेन भक्तिः प्रस्फूटिता भवति । वेदान्तप्रस्थाने विशिष्य भक्तेः वर्णनं गीताचार्येण भगवता श्रीकृष्णेन कृतम् । निष्कामकर्म एव भक्तिः इति भक्तिशब्दस्य तात्पर्यम् । निष्कलमषमनसा भक्तः यदा भगवन्तं ध्यायति तदा भक्तिः फलवती भवति । भगवति अनन्यं प्रेमः भक्तिः भवति । स्नेहेन एव दुर्लभमपि वस्तु सुलभं भवति । भगवान् कृष्णः अपि कथयति –

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।[16]

भगवदाश्रितानां भक्तानां न किञ्चित् भयं भवति । भक्त्या भगवत्पदप्राप्तिः, भगवत्सन्निधिः, भगवत्सादृश्यं भगवल्लोकस्य च प्राप्तिर्भवति । एवं भक्त्या सायुज्यसारूप्यसामीप्यसालोक्यरूपायाः मुक्तेः प्राप्तिः सम्भवति । इदमेव भक्तेः प्रयोजनम् ।

त्वां वर्धन्ति क्षितयः पृथिव्यां
त्वां राय उभयासो जनानाम्।

त्वां त्राता तरणे चेत्यो भूः
पिता माता सदमिन्मानुषाणाम् ॥[1]

य ऋषिरग्निदेवं पितृरूपेण मातृरूपेण च वर्णयति, तस्य हृदये भक्तिभावनाऽवश्यमेवासीत्।

वैदिकदेवेषु इन्द्रः शौर्यस्य प्रतीकः। दस्यूनां दमने मनुष्यास्तस्य साहाय्यं कामयन्ते। तस्यानुकम्पया आर्याः शत्रून् विध्वंसयितुं समर्था भवन्ति। शौर्यप्रधानेन इन्द्रेण सहानुरागसंबन्धस्याभावोऽनुमीयते, किन्तु तेन सहापि स्निग्धानुरागसंबन्धः स्थापितो वैदिकैः ऋर्षिभिः। इन्द्रस्तु न केवलं पिता, अपि तु माताऽपि वर्णितः-

त्वं हि न पिता वसो त्वं माता शतक्रतो बभूविथ।
अधा ते सुम्नमीमहे॥[2]

इन्द्रस्तु न केवलमुपासकानां सखा पिता वा, अपि तु पितृणामपि श्रेष्ठतमः -

सखा पिता पितृतमः पितृणां कर्तेमु लोकमुशते वयोधाः।[3]

इन्द्रदेवस्तु मित्रतायाः सहृदयताया मातृत्वस्य चावासभूमिः। को नाम मनुष्यो य एतावन्तं गुणिनं न कामयेत?

को नानाम वचसा सोमयाय
मनायुर्वा भवति वस्त उसगाः।
क इन्द्रस्य युज्यं कः सखित्वं
को भ्रत्रं वष्टि कवये क ऊती॥[4]

एषु मन्त्रेषु भक्तिभावस्तु सुतरां स्फुटो वर्तते।
केषुचिन्मन्त्रेष्वेतावाननुरागो वर्णितो यत् शृङ्गारभूमिं स्पृश्यते। एषु मन्त्रेषु शृङ्गारिकरहस्यात्मकता कमनीयतरा वर्तते चित्तमाकर्षति च। एकस्मिन् मन्त्रे आङ्गिरसऋषिः कथयति यद् यथा जाया पति परिष्वयति, तथा मम मतिरिन्द्रस्य परिरम्भणं करोतु –

अच्छा म इन्द्रं मतयः स्विर्वदः सध्रीचीविश्वा उशतीरनूषत।
परि ष्वजन्ते जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये ॥[5]

अपरस्मिन् मन्त्रे काक्षीवती घोषा अश्विनौ पृच्छति - हे अश्विनौ! युवां रात्रौ कुत्र वसथः? को वा प्रेमपाशेन तथा कर्षति यथा विधवा स्वदेवरम् -

कुह स्विद् दोषा कुह वस्तोरश्विना कुहभिपित्वं करतः कुहोषतुः।
को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ॥[6]

भक्तिभावनाया वरुणसूक्तेषु सर्वाधिक्यमुपलब्धं भवति। वैदिक देवेषु वरुणस्य स्थानं महत्वपूर्णं वर्तते। स तु सव्रत्र पश्यति (विश्वतश्चक्षुः), स घृतव्रतः, सुक्रतुः, सम्रट् चास्ति। स सर्वज्ञ, स्तोतृणां मते वरुणः करुणाया आस्पदभूतः। स अपराधिभ्यो दण्डं प्रयच्छति। स त्रतस्य नियामको निर्माता च। स्तोत्रे ऋषिरपराधक्षमापनार्थं मङ्गलप्रदानार्थं च प्रार्थयते -

य आपिर्नितयं वरुणः प्रियः सन् त्वामागासिं कृणवत् सखा ते।
मा त एनस्वन्तो यक्षिन् भूजेम यन्धि ष्मा विप्रः स्तुवते वरूस्थम् ॥[7]

इदं तु तटस्थरूपेणोपलब्धानां भक्तिमन्त्राणां निदर्शनम्, परन्तु प्राटीनाचार्याणां मतानुसारतः साक्षाद्रूपेण भक्तितत्त्वस्य समर्थनमुपलभ्यते मन्त्रेषु।

स्वभक्तिसूत्रे शाण्डिल्यो वक्ति - भक्तिः प्रमेया श्रुतिभ्यः[8] श्रुतिभ्यो भक्तेरवगमो भवति। अस्य सूत्रस्य व्याख्यायां टीकाकर्ता नारायणतीर्थेन भक्तेर्नवविधप्रकारस्य समर्थकानां मन्त्राणां सव्याख्यानमुद्धरणं प्रस्तुतम्। अत्र केषाञ्चिदुद्धरणं प्रस्तूयते-

तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन।
आस्य जानन्तो नाम चिद् विविक्तन महस्ते विष्णो सुमतिं भजामहे ॥[9]

अस्य मन्त्रस्यायमाशयः - स्वमत्यनुरूपं जगतः कारणभूतस्य विष्णोः स्तवनं कुरु। स वेदान्तवाक्यानां (ऋतस्य) प्रतिपाद्यः। तस्य स्तुत्या जन्मप्राप्तिर्न भवति। स्तुत्याभावे तस्य नामसङ्कीर्तनं कुरु। वयं विष्णोस्तेजसो गुणातिरूपस्य च सेवनं कुर्मः। अस्मिन् मन्त्रे भगवत्स्तुतिर्नामस्मरणञ्च निर्दिष्टं वर्तते।

यः पूर्वाय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति।
यो जातमस्य महतो महि ब्रवत् सेदु श्रवोभिर्युज्यं चिदभ्यसद् ॥[10]

यः प्राचीनतमाय नित्यनूतनाय, सृष्टिकत्रे स्वयमुत्पन्नाय विष्णवे द्रव्यं स्वात्मानं चार्पयति, यो महतो विष्णोर्महनीयकर्मणां कीर्तनं करोति सः दाता स्तोता वा कीर्त्या अन्नेन वा युक्तः सन् परमपदं प्राप्नोति। अत्र तु श्रवणं कीर्तनं भगवदर्पणं च स्पष्टं निर्दिष्टं वर्तते।
ब्रह्मणकालेऽप्युपासनायां भक्तेः स्वरूपं बद्धमूलं दृश्यते। यद्यपि ब्रह्मणग्रन्थेषु कर्मणः प्राधान्यम्, तथापि श्रद्धायुक्ता भक्तिरपि स्पष्टतरा दृश्यते। आरण्यकेषु बहिर्यागानामपेक्षया अन्तर्यागस्य महत्त्वं प्रदर्शितं वर्तते। अस्मिन् समये तु योगस्यापि प्रचार आसीत् साधकानां चित्तं तु भक्तिप्रत्युन्मुखमासीत्। उपनिषत्सु ज्ञाननिदर्शकानि, किन्तु तेष्वपि भक्तेर्निदर्शनं प्राप्यते।
कठोपनिषदि तु भक्तिभावस्य स्पष्टं वर्णनमुपलभ्यते। आत्मोपलब्धेरुपायान् दर्शयन्ती श्रुतिः कथयति -

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥[11]

अयमात्मा वेदाध्ययन, धारणाशक्त्या, श्रवणेन चापि नोपलभ्यते। अयं साधको यमात्मानं वरयति तेनैवात्मना एष प्राप्तव्यः। तं प्रति एष आत्मा स्वां तनुं विवृणुते। भावस्त्वयं यदात्मनैवात्मोपलभ्यते। अस्मिन् मन्त्रेऽनुग्रहस्य निर्देशो वर्तते। अपरस्मिन् मन्त्रे तु प्रासादस्य स्पष्टनिर्देशोऽस्ति -

तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः ॥[12]

अर्थात् निष्कामपुरुषस्य जगत्कर्तुः प्रसादेन स्वात्मानो महिमानं पश्यति गतमन्युश्च भवति।
वैष्णवसम्प्रदाये प्रसादस्य अतिमहत्त्वं वर्तते। भगवतोऽनुग्रहैणैव भक्तस्य कामनासिद्धिर्भवति। श्रीमद्भागवते इदं पोषणम् इत्यभिधानेनाभिहितम् (पोषणं तदनुग्रहः........... भा. २/१०/४) अनेन बल्लभाचार्यमतं पुष्टिमित्यभिहितम्। श्वेताश्वतरोपनिषदि वर्णितं यत् तप इत्यादिप्रभावातिरिक्तं देवप्रसादेनापि श्वेताश्वतरऋषिः सिद्धिं प्राप्तवानिति (६/२१)। अत्र भक्तेः प्रथमतया स्पष्टं प्रतिपादनं प्राप्यते –

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥[13]

यस्य नरस्य देवे उत्कृष्टा भक्तिर्भवति, तता देववदेव गुरावपि भक्तिर्भवेत्, तमेव महात्मानम् इमे उक्ता अर्थाः स्पष्टमवभासन्ते। उपनिषत्सु तु भक्तिशब्दस्यायं प्रथमो नामतः प्रयोगो वर्तते। परवर्तिनि साहित्ये गुरोर्यन्महत्त्वं दरीदृश्यते तस्य मूलरूपा एषा श्रुतिः। वैष्णवमते तु भक्तेरपेक्षया प्रपत्तेर्महत्त्वमधिकं वर्तते। प्रपत्तौ तु भगवान् एवोपेय

उपायश्च वर्तते । आवश्यकता त्वेषा यद् भक्तो भगवन्तं शरणं गच्छेत् । शरणापन्नं भक्तं भगवानुद्धरति । अस्य प्रपत्तिसिद्धान्तस्य प्रतिपादनं श्वेताश्वतरोपनिषदीत्थमुक्तम् -

यो ब्रह्माणं विदधाति पूर्वं
यो वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये ॥[14]

अस्मिन् मन्त्रे ब्रह्मणस्तत्कारणभूतस्य वेदस्य चोत्पादकस्य भगवतः शरणं प्रापणीयमिति वर्णितम् । श्रीमद्भगवीता तु वैष्णवानां सर्वश्रेष्ठ ग्रन्थः, अस्मिन् विषये गीताऽपि कठोपनिषदः श्वेताश्वतरोपनिषदश्चानुयायिनी । इत्थं दृश्यते यद् भक्तिसिद्धान्तो वैदिकः । सत्यकामस्य सत्यसंकल्पस्य च ब्रह्मणः प्रसादेनैव साधको भौतिकक्लेशेभ्यो मुक्तो भवति ।

प्राचीनटीकाकर्तृणामपि ध्यानमत्रासीत् । महाभारतस्य प्रथितव्याख्याकर्त्रा नीलकण्ठेन 'मन्त्ररामायणम्' 'मन्त्रभागवतम्' इति च यल्लिखितं तत्र वैदिकमन्त्रैर्वेदेषु रामाख्यानस्य भागवताख्यानस्य स्फुटीकरणमस्य निदर्शनम् । श्रीमद्भागवतस्य दशमस्कन्धे सप्ताशीतितमेऽध्याये वेदस्तुतिर्वर्तते, यस्याभिप्रायस्त्वयमेव यद् भक्तिरपि श्रुतीनां प्रतिपाद्यास्ति । पुराणकर्तुर्वेदव्यासस्य मतमप्येतदेव । वस्तुतः सर्वेषां धर्मदर्शनसिद्धान्तानां मूलभूतो वेद एव । भक्तेरुद्भवो मनसो वशीकरणेन भवति । मनसो वशीवरणं तु गुरुकृपया भवति । अस्मिन् विषये उपनिषदो नानामन्त्राणां सारो वेदस्तुतेरस्मिन् पद्ये उपलभ्यते -

विजितहृषीकवायुभिरदान्तमनस्तुरगं
य इह यतन्ति यन्तुमतिलोलमुपायखिदः ।
व्यसनशतान्विताः समवहाय गुरोश्चरणं
वणिज इवाज सन्त्यकृतकर्णधरा जलधौ ॥[15]

श्रीमद्भागवतमहापुराणे भक्तेर्विवेचनं वैशद्येन वर्तते । नवधाभक्तेर्विवेचनं तु प्रसिद्धमेवास्ति । अयमेव निष्कर्षो यद् ज्ञानकर्मसिद्धान्तवद् भक्तिसिद्धान्तोऽपि वैदिकसंहितायां स्फुटं बीजवन्निर्दिष्टो विलसति । अत एव भक्तेरर्वाचीनत्वमवैदिकत्वं च प्रतिपादयन्तो विपश्चितो नूनं परास्ता इति वेदितव्यम् ।

वेदान्तप्रस्थाने परमार्थतो भक्तिः इति किञ्चित् पृथगेव नास्ति । भक्तिशब्दस्तु निष्कामकर्मपरकया ज्ञानमित्यर्थः स्वीकृतः । स्थुलात् सूक्ष्मं प्रति इति नियमात् शास्त्रेषु स्थूलारुन्धतीन्यायदर्शनात् औपचारिकदृष्ट्या भक्तिद्वारैव ज्ञानप्राप्तिर्भवतीति निर्णितम् । यत्र फलेच्छया भगवदर्चनं अभिधीयते तत्र तात्कालिकं तन्निमित्तकं च फलं लभ्यते एव । परन्तु यत्र फलवितृष्णां विना भगवदर्चनं तदेकमनसा अभिधीयते तत्र ब्रह्मपदप्राप्तिरूपं फलं स्वत एव सिद्धं भवति । एवञ्च परमपुरुषार्थं प्रति भक्तिः परम्परया सहकरोति । ज्ञानं तु साक्षादेव इति वेदान्ते कथितमस्ति । ब्रह्म एव साक्षात् ज्ञानमिति पदेन अभिधीयते । तदुक्तम् - यत्साक्षादपरोक्षाद् ब्रह्म[17] इति । एतस्यैव भक्तितत्त्वस्य भागवतादिषु शास्त्रेषु विशदं वर्णनं विहितं व्यासेन । भक्तिः नवधा वर्णितास्ति । तद्यथा –

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥[18]

एतैः नवविधैः भक्तिभिः भगवत्पदप्राप्तिः शक्या भवतीति भागवताः निगदन्ति । भगवद्वचनामृतस्य निरन्तरश्रवणं श्रवणरूपा भक्तिः इति कथ्यते । तदैकमनसा भगवतः गुणकीर्तनं कीर्तनरूपा भक्तिः । देवस्य निरवच्छिन्नरूपेण नाम स्मरणं स्मरणरूपा भक्तिः इति कथ्यते । सदा भगवतः सेवाकरणं सेवनरूपाभक्तिः कथ्यते । अनन्यमनसा घृतदीपपुष्पनैवेद्यादिभिः भगवतः पूजनम् अर्चनरूपा भक्तिः भवति । भगवत् प्राप्त्यर्थं विविधस्तुतिवचनानां गानं वन्दनमिति कथ्यते । सर्वधर्मान् परित्यज्य भगवति आत्मसमर्पणमर्थात् तस्य दासत्वस्वीकरणं यया जायते सा दास्यरूपा भक्तिः । भगवति अनन्यसम्बन्धस्य स्थापनेन भक्तस्य नैकट्यं जायते । सा सख्यरूपा भक्तिः भवति । अनन्यभक्त्या आत्मीयभावेन च भगवति या रहस्याभिव्यक्तिः क्रियते सा आत्मनिवेदनरूपा भक्तिः भवति । एतादृश्याः भक्तेः चर्चा गीतायामपि भगवता गीताचार्येण अकुण्ठितचेतसा कृता वर्तते । कुन्तिनन्दनस्य अर्जुनस्य शिष्यस्तेहं शाधि मां त्वां प्रपन्नाम् (गीता. २-७) इति भगवति या अनन्या प्रीतिः अर्जुनस्य परिलक्ष्यते सा प्रकृष्टभक्तेः निदर्शनमेव । भगर्वीतायां भक्तेः राजगुह्ययोगः राजविद्या च इति आख्या प्रदत्ता वर्तते ।

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥[19]
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥[20]

अनेन पद्येन शरणागतिरूपायाः भक्तेः सूचना अस्ति । भक्त्या भगवान् भक्तस्य सर्वविधं सुखं कल्पयति । तदुक्तम् –

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यमि मा शुचः ॥[21]

गीताशास्त्रोक्ता इयं भक्तिः ज्ञानकर्मभ्यां प्रेरितः वस्तुतः आलोच्यमाने पराभक्तिः, ज्ञानं, निष्कामकर्म इत्येतत् त्रितयमेकमेव भवति । निर्विशेष अपरोक्ष आत्मानुभूतौ एतेषां पर्यवसानम् । यावत् आत्मसाक्षात्कारः तावत् पर्यन्तं ज्ञानमिति, भक्ति इति, कर्म इति, वाचारम्भण विकारमात्रं भवति । उदिते त्वात्मज्ञाने सर्वाण्येतानि स्वयमेव निर्गुणात्मकरूपेण परिणतानि भवन्ति । पराभक्त्यवस्थायां न कोऽपि भक्तः, तत्र न कश्चन भज्यः, न वा भजनं, तत्र तु एतेषां त्रयाणाम् अभेद एव । भक्तेः प्रयोजनं वर्णयतः गीताचार्येण एवमुच्यते - यः भगवच्चरणारविन्दे आत्मसमर्पणं करोति सः निश्चयेन अस्माज्जननमरणपरम्परायुक्तसंसारात् विमुक्तो भवति ।

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥[22]

अपि च अस्मिन् संसारे चतुर्विधाः भक्ताः अवलोक्यन्ते । ते च अर्थार्थी, आर्त्तः, जिज्ञासु, ज्ञानी इति नामभिः अभिधीयन्ते । फलेच्छया यः भगवदर्चनं करोति सः अर्थार्थीभक्तो भवति । भगवच्चरणप्राप्तिविषये व्याकुलितमनाः ये भवन्ति ते आर्त्ताः । सततभगवत्तत्त्वान्वेषिणः जिज्ञासु भक्ताः भवन्ति । सर्वं वैषयिकसुखं तुच्छमिति मत्वा ये भक्ताः तत्पदलालायितचित्ताः ते ज्ञानीभक्ताः भवन्ति । ज्ञानीभक्ताः एव भगवतः अत्यन्तप्रियाः भवन्ति ।

तेषां ज्ञानी नित्ययुक्त एक भक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय: ॥[23]

एवं भक्तिस्वरूपं यद्यपि निरूपितं, तथापि परा भक्तिरेव ज्यायसी (श्रेष्ठतरा) भवति । सैव आत्मसाक्षात्कारसाधिका भवति । केवलं ज्ञानरूपा च भवति इति निष्कर्षः ।

**पादटीप्पणी -**

1 - ऋ. - ६/१/५
2 - ऋग्वेद, - ८/९८/११
3 - ऋ. - ८/९८/११
4 - ऋग्वेद, - ४/२५/२
5 - ऋग्वेद, - १०/४३/१
6 - ऋग्वेद, - १०/४०/२
7 - ऋ.वे. - ७/८८/६
8 - शा.भ.सू - १/२/९
9 - ऋ.वे. - १/१५६/३
10 - ऋ.वे. १/१५६/२
11 - कठ - १/२/२३
12 - कठ - १/२/२०
13 - श्वेता. - ६/२३
14 - श्वेता. - ६/१८
15 - भागवतम्, - १०/८७/३३
16 - गी. - ४/११
17 - बृ.उ. - ३/४/१
18 - भा. - ७/५/२३
19 - गीता. - ९/३४
20 - गीता. - १८/६५
21 - गीता. - १८/६६
22 - गीता. - १२/७

23 - गीता. - ७/१७ 24 - गीता. - ७/१७

**सन्दर्भग्रन्थाः**


1. अमरकोशः अमरसिंहः चौखम्बा संस्कृत सीरीज आफिस,१९९८
2. वाराणसी
3. ईशादि नौ उपनिषद् गीताप्रेस, गोरखपुर २०१० शाङ्करभाष्यार्थ
4. ईशाद्यष्टोत्तरशतोपनिषदः वासुदेवलक्ष्मणपणशीकरः चौखम्बा विद्याभवन, वाराणसी २००२
5. उपनिषत्संग्रहः श्रीनगेन्द्रप्रसादजैन मोतिलाल बनारसी दास, दिल्ली १९७०
6. उपनिषद्वाक्यमहाकोषः मोतिलाल वनारसी दास, दिल्ली १९६३
7. कठोपनिषद् गीताप्रेस, गोरखपुर २०१०
8. छान्दोग्योपनिषद् गीताप्रेस,गोरखपुर २०१०
9. दार्शनिकनिबन्धाः डॉ. सुकान्तकुमारसेनापतिःमान्यता प्रकाशन, दिल्ली २०११
10. भारतीयदर्शन डॉ. उमेशमिश्रः उत्तरप्रदेश हिन्दी संस्थान, लखनऊ २००३
11. भारतीयदर्शन बलदेव उपाध्याय शारदा मन्दिर,वाराणसी २००९
12. महाभारतम् भगवान् व्यासः गीताप्रेस, गोरखपुर २००३
13. वेदान्तविमर्श डॉ. ओभिमन्यु परमलपब्लिकेसन्स, दिल्ली १९६१
14. वेदान्तसारः सदानन्दयतिः चौखम्बा विद्याभवन, वाराणसी २००२ (विद्वन्मनोरञ्जिनी टीका)
15. श्रीमद्भगवद्गीता भगवान् व्यास: गीताप्रेस, गोरखपुर २००९